॥ श्री जिनाय नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्री हंसकेशवचरित्रं ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित भाषांतर करनार तथा छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज

( आ ग्रंथना अन्वय तथा भाषांतरना सर्व हक स्वाधिन राख्या छे )

विक्रम संवत् १९८४ सने १९२८ वीर संवत् २४५४

किमत रु. १—८—०

॥ श्री जिनाय नमः ॥

॥ श्री चारित्रविजयगुरुभ्यो नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्री हंसकेशव चरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

सान्वयभाषांतरकर्ता—पंडित श्रावक हीरालाल हंसराज—जामनगरवाळा

आहतं दुःखपूराय विमुक्तं पुण्यपंक्तये । स्यान्निशाभोजनं हन्त हंसकेशवयोरिव ॥ १ ॥

अन्वयः—–हंत हंसकेशवयोः इव आहतं निशाभोजनं दुःखपूराय, विमुक्तं पुण्यपंक्तये. ॥ १ ॥

अर्थः अरे! हंस अने केशवनी पेठे करेलु रात्रिभोजन दुःखोनो समूह देनारुं, अने छोडेलु रात्रिभोजन पुण्योनी श्रेणि आपनारुं थायछे.

**तद्यथा पृथिवीकान्ताकुण्डलं कुण्डिनं पुरम् । अस्ति मुक्तास्रगाकारप्राकारपरिवेषभृत् ॥ २ ॥**

अन्वयः–तत् यथा–पृथिवी कांता कुंडलं, मुक्ता स्रगाकार प्राकार परिवेषभृत् कुंडिनं पुरं अस्ति. ॥ २ ॥

अर्थः–ते आवी रीते–पृथ्वीरूपी स्त्रीना कुंडल सरखुं, अने मोतीनी माळा सरखा गढथी घेरायेलु कुंडिनपुर नामे नगर छे. ॥२॥

**तस्मिन्यशोधनो नाम यशोधवलितावनिः । बभूव नवद्रव्योपार्जकचूडामणिर्वणिक् ॥ ४ ॥**

अन्वयः––तस्मिन् यशोधवलितावनिः, नव द्रव्योपार्जक चूडामणिः यशोधनः नाम वणिक् बभूव. ॥ ४ ॥

अर्थः ते नगरमां यशवडे श्वेत करेल छे पृथ्वी जेणे, तथा नवुं द्रव्य उपार्जन करनाराओमां मुकुट सरखो यशोधननामे वणिक् हतो

**अभूतां भुवनानन्दचन्दनौ तस्य नन्दनौ । रम्भाकुक्षिसरोम्भोजश्रीहंसौ हंसकेशवौ ॥ ५ ॥**

अन्वयः––तस्य भुवनानंद चंदनौ, रंभा कुक्षि सरः अंभोज श्रीहंसौ हंसकेशवौ नंदनौ अभूतां. ॥ ५ ॥

अर्थः-ते शेठने जगतने आनंद करवामां चंदन सरखा, तथा रंभानी कुक्षीरूपी तळावमां रहेला कमळने शोभावनारा हंससरखा हंस अने केशव नामना बे पुत्रो हता. ॥ ५ ॥

ये दोषाभोजने दोषा धर्मघोषाभिधाद्गुरोः । वनं गताभ्यां ते ताभ्यां देशनासु निशामिताः ॥ ६ ॥

अन्वयः—वनं गताभ्यां ताभ्यां धर्मघोषाभिधात् गुरोः देशनासु दोषा भोजने ये दोषाः, ते निशामिताः. ॥ ६॥

अर्थः—वनमां गयेला एवा ते बन्ने भाइओए धर्मघोष नामना गुरु पासेथी उपदेशमारफते रात्रिभोजन करवामां जे दोषो रहेला छे, ते सांभळ्या. ॥ ६ ॥

तौ बोधात्तं गुरुं साक्षीकृत्य कृत्यविवेकनौ । रजनीभोजनत्यागं मुदितौ चक्रतुस्ततः ॥ ७ ॥

अन्वयः—ततः बोधात् तं गुरुं साक्षीकृत्य कृत्य विवेकिनौ तौ मुदितौ रजनी भोजन त्यागं चक्रतुः. ॥ ७ ॥

अर्थः त्यारथी बोध पामीने तेज गुरुने साक्षीरूप करीने कार्यनो विवेक धरनारा एवा तेओ बन्नेए खुशी थइने रात्रिभोजननोत्यागकर्यो.

अथ धाम्नि गतौ मध्यंदिने जनितभोजनौ। भागेऽष्टमेऽह्नस्तौ मातुर्वैकालिकमयाचताम् ॥ ८ ॥

अन्वयः—अथ मध्यंदिने जनित भोजनौ तौ धाम्नि गतौ अन्हः अष्टमे भागे मातुः वैकालिकं अयाचतां. ॥ ८ ॥

अर्थः—हवे मध्यान्हकाळे करेलुं छे भोजन जेओए, एवा तेओ बन्ने घेर गया, तथा दिवसनो आठमो भाग ज्यारे बाकी रह्यो, त्यारे तेओए (पोतानी) माता पासे वाळु करवामाटे भोजन माग्युं. ॥ ८॥

किं भोज्यमधुना वत्सौ यतो दुग्धप्रियो युवाम्। तत्पुनः स्थितवेलायां निशि स्यात्तत्किमुत्सुकौ॥ ९ ॥

इति मातुर्वचः श्रुत्वा तौ सत्यमिदमूचतुः। आवाभ्यां नियमान्मातस्तत्यजे रात्रिभोजनम् ॥१०॥युग्मम्॥

अन्वयः—(हे) वत्सौ! अधुना किं भोज्यं? यतः युवां दुग्धप्रियौ, तत्पुनः स्थितवेलायां निशि स्यात्, तत् किं उत्सुकौ? । ९ ।
इति मातुः वचः श्रुत्वा तौ इदं सत्यं ऊचतुः, (हे) मातः! आवाभ्यां नियमात् रात्रिभोजनं तत्यजे. ॥ १० ॥ युग्मं॥

अर्थः—(हे) पुत्रो! आ वखते तमो शुं जमशो? केमके (वाळु करवामां) तमोने दूध जोइशे, अने ते तो नियमित वखते रात्रिएज

मळी शकशे, माटे तमो शामाटे उतावळ करो छो? ॥ ९ ॥ एवी रीतनुं मातानुं वचन सांभळीने तेओए आ प्रमाणे सत्य कहुं के, (हे) मातजी! अमोए नियम लेइ रात्रिए भोजन करवानो त्याग कर्यो छे. ॥ १० ॥ युग्मं

**इदं गर्भगृहस्थेन निशम्य वचनं तयोः । यशोधनेन सक्रोधं दध्ये मध्ये हृदस्तदा ॥ ११ ॥**

अन्वयः—तदा तयोः इदं वचनं निशम्य गर्भगृहस्थेन यशोधनेन सक्रोधं हृदः मध्ये दध्ये. ॥ ११ ॥

अर्थः—ते वखते तेओनुं आ वचन सांभळीने ओरडामां रहेला यशोधने क्रोध सहित मनमां विचार्युं के, ॥ ११ ॥

**ध्रुवं धूर्तेन केनापि सुतौ मे विप्रतारितौ । ततः कुलक्रमायातं त्यजतो रात्रिभोजनम् ॥ १२ ॥**

अन्वयः—ध्रुवं केन अपि धूर्तेन मे सुतौ विप्रतारितौ, ततः कुल क्रमायातं रात्रिभोजनं त्यजतः. ॥ १२ ॥

अर्थः-खरेखर कोइक पण धूताराए मारा पुत्रोने ठग्या छे, अने तेथी कुलपरंपराथी चाल्या आवता रात्रिभोजननो तेओत्याग करेछे.

**तदवश्यं बुभुक्षार्तौ कृत्वा द्वित्रैर्दिनैः सुतौ । त्याजयिष्यामि तं रात्रिभोज्यत्यागकदाग्रहम् ॥ १३ ॥**

अन्वयः—तत् अवश्यं सुतौ द्वित्रैः दिनैः बुभुक्षार्तौ कृत्वा तं रात्रिभोज्य त्याग कदाग्रहं त्याजयिष्यामि ॥ १३ ॥

अर्थः—माटे खरेखर आ पुत्रोने बे त्रण दिवसोसुधी भुख्या राखीने ते रात्रिभोजनना त्यागना दुराग्रहने छोडावीश. ॥ १३ ॥

**एवं चिन्तयता तेन रम्भा स्थालार्थमागता । सुतयोर्भोजनं देयं नेति च्छन्नं न्यवार्यत ॥ १४ ॥**

अन्वयः—एवं चिंतयता तेन स्थालार्थं आगता रंभा सुतयोः भोजनं न देयं, इति छन्नं न्यवार्यत. ॥ १४ ॥

अर्थः—एम विचारता एवा ते यशोधने स्थाल लेवामाटे (ओरडामां) आवेली रंभाने "तारे पुत्रोने भोजन आपवुं नही" एम गुप्तरीते निवारण कर्युं. ॥ १४ ॥

**भर्तुराज्ञावशादेषा तावेत्यावददित्यथ । अन्नपाकोऽधुना भावी पक्वान्नाद्यस्ति वस्तु न ॥ १५ ॥**

अन्वयः—अथ भर्तुः आज्ञावशात् एषा एत्य तौ इति अवदत्, अधुना अन्नपाकः भावी, पक्वान्नआदिवस्तु न अस्ति. ॥ १५ ॥

अर्थः—हवे स्वामिनी आज्ञाने वश थवाथी तेणीए (बहार) आवी ते पुत्रोने एम कह्युं के, रसोइ हजु हवे थशे, अने पक्वान्नआदि

कंइं वस्तु हाजर नथी. ॥ १५ ॥

**किं च रात्रौ समं पित्रा युवाभ्यां भोज्यमेव यत् । कुलीनास्ते सुता ये स्युः पितृमार्गानुगामिनः ॥ १६ ॥**

अन्वयः-किंच रात्रौ युवाभ्यां पित्रा समं एव भोज्यं, यत् कुलीनाः ते सुताः स्युः, ये पितृमार्ग अनुगामिनः. ॥ १६ ॥

अर्थः-वळी रात्रिए तमारे (तमारा) पितानी साथेज भोजन करवुं, केमके कुलीन ते पुत्रोज कहेवाय, के जेओ पिताने मार्गेचाले.

**स्मित्वा तावूचतुर्मातः सन्मार्गः सेव्यते पितुः । सुपुत्रैरपि किं कूपे पतंस्तातोऽनुगम्यते ॥ १७ ॥**

अन्वयः-स्मित्वा तौ ऊचतुः, ( हे ) मातः सुपुत्रैः अपि पितुः सन्मार्गः सेव्यते, कूपे पतन् तातः किं अनुगम्यते ? ॥ १७ ॥

अर्थः--( त्यारे ) तेओए जरा हसीने कह्युं के, ( हे ) माताजी सुपुत्रो पण पिताना उत्तम मार्गने अनुसरे, परंतु कुवामां पडता पितानुं पण शुं तेओ अनुगमन करे ? ॥ १७ ॥

**तर्हि सम्प्रति लप्स्येथे न युवां भोजनं सुतौ । मात्रेत्युक्तौ ततो मौनं कृत्वा तौ जग्मतुर्बहिः ॥ १८ ॥**

अन्वयः-( हे ) सुतौ ! तर्हि संप्रति युवां भोजनं न लप्स्येथे, इति मात्रा उक्तौ तौ मौनं कृत्वा ततः बहिः जग्मतुः. ॥ १८ ॥

अर्थः—हे पुत्रो त्यारे तो हमणां तमोने भोजन मळशे नही, एम माताए कहेवाथी तेओ मौन रही त्यांथी बहार चाल्या गया. ।१९।

श्रेष्ठिनः सुतयोर्वाक्यं मिथ्यादृष्टेर्जगत्प्रियम् । विशेषाद्दोषकृज्जज्ञे ज्वरार्तस्य हविर्यथा ॥ २० ॥

अन्वयः-यथा ज्वरार्तस्य हविः, सुतयोः जगत्प्रियं वाक्यं मिथ्यादृष्टेः श्रेष्ठिनः विशेषात् दोष कृत् जज्ञे. ॥ २० ॥

अर्थः—जेम ताववाळाने खवरावेलु घी, तेम ते पुत्रोनुं जगतने गमतुं एवुं पण ते वाक्य मिथ्यादृष्टि एवा ते यशोधन शेठने विशेष प्रकारे दोष उत्पन्न करनारुं थयुं. ॥ २० ॥

भवत्या भोजनं देयं रजन्यामेव पुत्रयोः । इत्थमत्यर्थशपथैः श्रेष्ठी रम्भामवारयत् ॥ २१ ॥

अन्वयः-भवत्या पुत्रयोः रजन्यां एव भोजनं देयं, इत्थं अत्यर्थशपथैः श्रेष्ठी रंभां अवारयत्. ॥ २१ ॥

अर्थः—तारे ( आ ) पुत्रोने फक्त रात्रिएज भोजन आपवुं, एम आकरा सोगनो आपीने ते यशोधन शेठे रंभाने निवारण कर्युं. । २१ ।

जनन्याथ रजन्यां तावागतावर्थितावपि । न भोजनं महासत्त्वचक्रिणो चक्रतुस्तदा ॥ २२ ॥

अन्वयः-अथ रजन्यां आगतौ जनन्या अर्थितौ अपि महासत्त्वचक्रिणौ तौ तदा भोजनं न चक्रतुः. ॥ २२ ॥

अर्थः-पछी रात्रिए आवेला एवा तेओने माताए समजाव्या छतां पण धैर्यवंतोमां शिरोमणि एवा तेओए ते वखते भोजन कर्युं नही.।२२।

द्वितीयेऽह्नि शठश्रेष्ठः श्रेष्ठी तौ विशदाशयौ । क्रयविक्रयलीलासु न्ययुंक्त महतीष्वसौ ॥ २३ ॥

अन्वयः-द्वितीये अह्नि असौ शठश्रेष्ठः श्रेष्ठी विशदाशयौ तौ महतीषु क्रयविक्रयलीलासु न्ययुंक्त. ॥ २३ ॥

अर्थः—बीजे दिवसे आ अत्यंत लुच्चा एवा यशोधन शेठे निर्मल विचारवाळा एवा ते बन्ने पुत्रोने महोटा लेवडदेवडना व्यापारमां जोडी दीधा. ॥ २३ ॥

तथा लाभरसाभोगभङ्गीभिस्तौ विलेसतुः । तदेव कुर्वतोः कर्म यथागान्निधनं दिनम् ॥ २४ ॥

अन्वयः-लाभरसाभोगभंगीभिः तौ तथा विलेसतुः, यथा तत् एव कर्म कुर्वतोः दिनं निधनं अगात्. ॥ २४ ॥

अर्थः—( ते व्यापारमां ) वटाव थवाना रसना स्वादनी युक्तिओवडे तेओ बन्ने एटला तो मशगुल थया, के जेथी ते कार्य करतांज तेओनो आखो दिवस व्यतीत थयो. ॥ २४ ॥

**तौ धाम यामिनीयामसमये समुपागतौ । अभुक्त्वैवापतुः स्वापं तदभिग्रहसाग्रहौ ॥ २५ ॥**

अन्वयः—यामिनी याम समये धाम समुपागतौ तदभिग्रह साग्रहौ तौ अभुक्त्वा एव स्वापं आपतुः. ॥ २५ ॥

अर्थः—रात्रिने पहेले पहोरे घेर आव्याबाद पोताना नियममां निश्चल एवा तेओ बन्ने भोजन कर्या विनाज उंघी गया. ॥२५॥

**इति व्यवहृतिं पित्रा कार्यमाणौ रसेन तौ । अजातभोजनावेव प्रसुप्तौ पञ्च शर्वरीः ॥ २६ ॥**

अन्वयः—इति पित्रा व्यवहृतिं कार्यमाणौ तौ रसेन अजातभोजनौ एव पंच शर्वरीः प्रसुप्तौ. ॥ २६ ॥

अर्थः—एवी रीते पिताए व्यापारमां जोडेला एवा तेओ बन्ने (तेना) रसथी भोजन कर्याविनाज पांच रात्रिसुधी सुइ रह्या. ।२६।

**षष्ठेऽहनि निशारम्भे संभेजतुरिमौ गृहम् । आचष्ट च वचः श्लक्ष्णं विनयेन यशोधनः ॥ २७ ॥**

अन्वयः-षष्ठे अहनि निशा आरंभे इमौ गृहं संभेजतुः, च यशोधनः विनयेन श्लक्ष्णं वचः आचष्ट. ॥ २७ ॥

अर्थः-छठ्ठे दिवसे रात्रिना प्रारंभ वखते ते बन्ने भाइओ (ज्यारे) घेर आव्या, (त्यारे) यशोधन शेठ (तेओने) विनयथी स्नेहना डोळवालु वचन कहेवा लाग्यो के, ॥ २७ ॥

**वत्सौ यत्सौख्यदं मे स्यादिष्टं स्पष्टं तदेव वाम् । इति प्रत्ययतः किंचिद्वच्मि तच्च विरच्यताम् ॥ २८ ॥**

अन्वयः-(हे) वत्सौ! मे यत् सौख्यदं स्यात्, तत् एव वां इष्टं स्पष्टं, इति प्रत्ययतः किंचित् वच्मि, तत् च विरच्यतां.॥ २८ ॥

अर्थः—हे पुत्रो ! मने जे सुखकारी थाय, तेज तमोने प्रिय छे, एम स्पष्ट जणाय छे, एवी (मने) खातरी थवाथी (हुं) तमोने कंइक कहुं छुं, ते मुजब करो ? ॥ २८ ॥

**निशाहारपरीहारं न वेद्मि युवयोर्ध्रुवम् । तदीदृशि भृशक्लेशे युवां कार्ये नियोजितौ ॥ २९ ॥**

अन्वयः-ध्रुवं युवयोः निशा आहार परिहारं न वेद्मि, तत् ईदृशि भृशक्लेशे कार्ये युवां नियोजितौ. ॥ २९ ॥

अर्थः—खरेखर तमारां रात्रिभोजन त्यागना नियमने हुं जाणतो नथी, अने तेथीज आवां अतिकष्ट आपनारां कार्यमां (में) तमो बन्नेने जोड्या. ॥ २९ ॥

यद्भुक्तवतोर्भुंक्ते युवयोर्न जनन्यपि । अद्यास्यास्तदभूत्षष्ठ उपवासः प्रयासकृत् ॥ ३० ॥

अन्वयः—युवयोः अभुक्तवतोः जननी अपि यत् न भुंक्ते, तत् अद्य अस्याः प्रयासकृत् षष्ठः उपवासः अभूत्. ॥ ३० ॥

अर्थः—(वळी) तमो बन्नेना नही जमवाथी(तमारी)माता पण जे जमती नथी, तेथी आजे तेणीने पण कष्टदायी छट्ठो उपवासथयोछे.

तद्वां षण्मासजन्मासौ स्वसा कुसुमकोमला । स्तन्यान्यलभमानाद्य कियन्म्लाना विलोक्यतां ॥ ३१ ॥

अन्वयः—तत् षण्मासजन्मा कुसुमकोमला वां असौ स्वसा स्तन्यानि अलभमाना विलोक्यतां ? अद्य कियन्म्लाना ! ॥ ३१ ॥

अर्थः—अने तेथी (फक्त) छ मासनीज उमरनी, अने पुष्पसरखी कोमल तमारी आ बेहेन धावण नही मळवाथी जुओ के, आजे केटली दुबळी पडी गइ छे ! ॥ ३१ ॥

म्लानिमस्याः शिशोर्वीक्ष्य कारणं मम पृच्छतः । आख्यद्भवदनाहारपूर्वं सर्वमयं जनः ॥ ३२ ॥

अन्वयः—अस्याः शिशोः म्लानिं वीक्ष्य कारणं पृच्छतः मम भवत् अनाहारपूर्वं सर्वं अयं जनः आख्यत्. ॥ ३२ ॥

अर्थः—(वळी) आ बाळकीनुं दुबळापणुं जोइने (तेनुं) कारण पूछतां मने तमारा नही जमवा आदिक सर्व वृत्तांत तेणीए कह्यो.

तद्भुज्यतां यथा भुंक्ते भवन्मातापि संप्रति । कृपासारौ शिशोरस्या मा भूत्पित्तादिभूर्व्यथा ॥ ३३ ॥

अन्वयः-तत् भुज्यतां, यथा भवन्माता अपि संप्रति भुंक्ते, कृपासारौ (युवां), अस्याः शिशोः पित्तादिभूः व्यथामाभूत्.।३३।

अर्थः-माटे तमो बन्ने हवे जमीलीयो, के जेथी हवे तमारी माता पण भोजन करे, (वळी तमो तो) महा दयाळु छो, वळी आ (बिचारी) बाळकीने पण पित्तआदिकना उछाळाथी कष्ट थवुं न जोइये. ॥ ३३ ॥

पूर्वं निशाया यामार्धं प्रदोषः कीर्त्यते बुधैः । प्रत्यूषं पश्चिमं तेन सा त्रियामेति विश्रुता ॥ ३४ ॥

अन्वयः-निशायाः पूर्वं यामार्धं बुधैः प्रदोषः कीर्त्यते, पश्चिमं प्रत्यूषं, तेन सा त्रियामा इति विश्रुता. ॥ ३४ ॥

अर्थः---रात्रिना आगला अर्धा पहोरने पंडितो " प्रदोष " कहे छे, अने पाछला ( अर्धा पहोरने ) " प्रत्यूष " कहे छे, अने तेथी ते रात्रि " त्रियामा " ( त्रण पहोरनी ) प्रसिद्ध छे. ॥ ३४ ॥

**इदानीं भोजनं तद्वां न निशाभोजनं भवेत् । यामिनीघटिकायुग्ममपि नाद्यापि याति यत् ॥ ३५ ॥**

अन्वयः-तत् इदानीं वां भोजनं निशाभोजनं न भवेत्, यत् अद्य अपि यामिनीघटिकायुग्मं अपि न याति. ॥ ३५ ॥

अर्थः—माटे आ वखते तमारुं भोजन ( कंइ ) रात्रिभोजन संभवीशके नही, केमके हजु बे घडी रात्रि पण गइ नथी. ॥ ३५ ॥

**इति तातगिरा भिन्नः क्षुधा च विधुरीकृतः । हंसः क्लेशहतावेशः केशवाननमैक्षत ॥ ३६ ॥**

अन्वयः-इति तातः गिरा भिन्नः, च क्षुधा विधुरीकृतः, क्लेश हतावेशः हंसः केशव आननं ऐक्षत. ॥ ३६ ॥

अर्थः—एवी रीतनां पितानां वचनथी नरम पडेलो, तथा क्षुधाए व्याकुल करेलो अने कष्टथी नाहिम्मत थयेलो हंस केशवना मुख तरफ जोवा लाग्यो. ॥ ३६ ॥

इति ज्यायांसमुद्भाव्य भ्रातरं कृत्यकातरम् । व्याचष्ट केशवः कष्टजनकं जनकं प्रति ॥ ३७ ॥

अन्वयः—इति ज्यायांसं भ्रातरं कृत्य कातरं उद्भाव्य केशवः कष्टजनकं जनकंप्रति व्याचष्ट. ॥ ३७ ॥

अर्थः—एवीरीते ( पोताना ) म्होटा भाइ हंसने क्षुधाथी कायर थयेलो जाणीने केशव ( पोताने ) कष्ट आपनारा पिताने कहेवा लाग्यो के, ॥ ३७ ॥

यस्ते सुखकरो भावः करोमि तमहं पितः । न ते सुखायते तत्किं यन्मे पातकघातकम् ॥ ३८ ॥

अन्वयः—( हे ) पितः ! यः भावः ते सुखकरः, तं अहं करोमि, मे यत् पातकघातकं तत् ते किं न सुखायते ? ॥ ३८ ॥

अर्थः—हे पिताजी ! जे कार्य आपने सुखकारी छे, ते हुं करुं छुं. तथा मारुं ( रात्रिभोजनना त्यागरूप ) जे कार्य पापोनो विनाश करनारुं छे, ते आपने केम रुचतुं नथी ? ॥ ३८ ॥

यज्जनन्यादिवात्सल्यं तच्छल्यं धर्मकर्मणः । स्वकर्मफलभुक्सर्वः कः कस्यार्थे करोत्वघम् ॥ ३९ ॥

अन्वयः-यत् जननी आदि वात्सल्यं तत् धर्म कर्मणः शल्यं, सर्वः स्वकर्मभुक्, कस्य अर्थे कः अघं करोतु.? ॥ ३९ ॥

अर्थः—( वळी ) माता आदिक प्रते जे वत्सलपणुं बतावबुं, ते धर्मकार्यमां ( विघ्नकारक ) शल्य सरखुं छे. सर्व जीवो पोताना कर्मो भोगवी रह्या छे, माटे कोइने माटे कोण पाप करे ? ॥ ३९ ॥

**मुहूर्तोऽह्नो मुखेऽन्ते च निशासन्नो निशासमः । तत्तत्रापि न भोक्तव्यं निशैवास्त्यधुना पुनः ॥ ४० ॥**

अन्वयः—अह्नः मुखे च अंते मुहूर्तः निशासन्नः निशासमः, तत् तत्र अपि न भोक्तव्यं, अधुना पुनः निशा एव अस्ति. ॥४० ॥

अर्थः-दिवसना प्रारंभमां, अने दिवसना अंत पहेलांनो बेघडी जेटलो समय रात्रिने नजदीक होवाथी रात्रि समानज छे, माटे ते वखते पण भोजन कराय नही, अने आ वखते तो रात्रिज छे. ॥ ४० ॥

**तद्वारं वारमेवं न वाच्योऽहं भवता पितः । कार्येऽस्मिन्विहिते शान्तिं क्व लभे भवतापितः ॥ ४१ ॥**

अन्वयः-तत् (हे) पितः! भवता वारंवारं अहं एवं न वाच्यः, भवतापितः अस्मिन् कार्ये विहीते शांतिं क्व लभे? ॥ ४१ ॥

अर्थः—माटे हे पिताजी! आपे वारंवार मने आ माटे कहेवुं नही. केमके संसारथी तपेलो एवो हुं आ रात्रिभोजननुं कार्य करीने क्यां शांति मेळवी शकुं? ॥ ४१ ॥

अथैनमेनसां धाता तत्पिता कुपितोऽवदत् । लङ्घसे यदि मद्वाचं मुञ्च लोचनवर्त्म तत् ॥ ४२ ॥

अन्वयः—अथ एनसां धाता तत्पिता कुपितः एनं अवदत्, यदि मद्वाचं लंघसे, तत् लोचनवर्त्म मुंच? ॥ ४२ ॥

अर्थः—पछी पापिष्ट एवा तेना पिताए क्रोध पामीने तेने कह्युं के, ज्यारे मारां वचननो तुं अनादर करे छे, त्यारे मारी आंखोथी तुं वेगळो जा? ॥ ४२ ॥

ततोऽथ विषभृद्वृन्दकन्दरादिव मन्दिरात् । स निःससार संसारकारणं ममतां त्यजन् ॥ ४३ ॥

अन्वयः—अथ संसार कारणं ममतां त्यजन् सः विषभृत्वृंदकन्दरात् इव ततः मंदिरात् निःससार. ॥ ४३ ॥

अर्थः—पछी संसारना कारणरूप ममताने तजतो एवो ते केशव सर्पोना समूहथी भरेली गुफामांथी जेम, तेम ते घरमांथी

निकळी गयो. ॥ ४३ ॥

हंसं तमनुगच्छन्तं कृच्छ्राध्धृत्वा यशोधनः । प्रलोभ्य बहुभिर्वाग्भिर्भोजनाय न्यवीविशत् ॥ ४४ ॥

अन्वयः—तं अनुगच्छंतं हंसं कृच्छ्रात् धृत्वा बहुभिः वाग्भिः प्रलोभ्य यशोधनः भोजनाय न्यवीविशत् ॥ ४४ ॥

अर्थः—तेनी पाछळ जता हंसने बळात्कारे पकडी राखीने, तथा घणां घणां वचनोथी ललचावीने यशोधने भोजन करवामाटे बेसाड्यो. ॥ ४४ ॥

पुरग्रामनगारामविलङ्घनघनक्रमः । स ययौ सप्तमेऽप्यह्नि तथैवावेशवान्पथि ॥ ४५ ॥

अन्वयः—पुर ग्राम नग आराम विलंघन घनक्रमः सः सप्तमे अपि अह्नि तथा एव आवेशवान् पथि ययौ. ॥ ४५ ॥

अर्थः--नगर, गाम, पर्वत, तथा बगीचाओने उल्लंघवामां उतावळी चालवाळो एवो ते केशव सातमे दिवसे पण तेवीज रीते पोताना नियममां निश्चल थयो थको मार्गे चालवा लाग्यो. ॥ ४५ ॥

अटन्नऽव्यां कुत्रापि निशीथसमयेऽथ सः। घनयात्राजनं यक्षायतनं किंचिदैक्षत ॥ ४६ ॥

अन्वयः—अथ अटव्यां अटन् सः निशीथसमये कुत्र अपि घनयात्राजनं किंचित् यक्ष आयतनं ऐक्षत. ॥ ४६ ॥

अर्थः—पछी अरण्यमां भमतां थकां तेणे मध्यरात्रिए क्यांक ज्यां यात्रा माटे घणा लोको एकठा थया छे, एवुं कोइक यक्षनुं मंदिर जोयुं. ॥ ४६ ॥

तत्र यात्राजना यक्षगृहे सज्जितभोजनाः। हृष्यन्तः समभाषन्त तमागच्छन्तमुत्सुकाः ॥ ४७ ॥

अन्वयः—तत्र यक्षगृहे सज्जित भोजनाः यात्राजनाः तं आगच्छंत (वीक्ष्य) हृष्यंतः उत्सुकाः समभाषंत ॥ ४७ ॥

अर्थः—ते यक्षना मंदिरमां तैयार करेल छे भोजन जेओए एवा ते यात्राळुओ ते केशवने आवतो (जोइने) हर्षित तथा उत्सुक थया थका कहेवा लाग्या के, ॥ ४७ ॥

एह्येहि भोज्यमादेहि देहि पुण्यानि पान्थ नः। पश्यामः काममतिथिं वयमारब्धपारणाः ॥ ४८ ॥

अन्वयः—(हे) पांथ! एहि? एहि? भोज्यं आदेहि? नः पुण्यानि देहि? आरब्धपारणाः वयं क मं अतिथिं पश्यामः ।। ४८ ।।

अर्थः—हे पथिक! तुं आव आव? अने भोजन ग्रहण कर? तथा अमोने पुण्य आप? पारणाभाटे तैयारी करता एवा अमो (कोइ) अतिथिनी बहु राह जोइए छीये. ।। ४८ ।।

**कीदृग्बत व्रतं यस्य निशि पारणमित्यथ । केशवो विकसत्पुण्यसन्तानस्तानभाषत ॥ ४९ ॥**

अन्वयः—अथ विकसत्पुण्यसंतानः केशवः तान् इति अभाषत, बत यस्य निशि पारणं, कीदृग व्रतं? ।। ४९ ।।

अर्थः—त्यारे विकस्वर थयेल छे पुण्यपरंपरा जेनी एवा ते केशवे तेओने एम कह्युं के, अरे! जेनुं रात्रिए पारणुं थाय, एवुं ते (आ तमारुं) कयुं व्रत छे? ।। ४९ ।।

**तेऽवदन्माणवाख्योऽयं यक्षो दक्षो जगन्मुदे । स्यादस्याद्य महायात्रा पुण्यपात्रायितस्थितिः ॥ ५० ॥**

अन्वयः—ते अवदन् जगन्मुदे दक्षः अयं माणवाख्यः यक्षः, अस्य अद्य पुण्यपात्रायितस्थितिः महा यात्रा स्यात्. ।। ५० ।।

अर्थः—(त्यारे) तेओए कह्युं के, जगत्‌ने खुशी करवामां चतुर, एवो आ माणव नामनो यक्ष छे, अने तेनी आजे पुण्योना पात्ररूप थयेला आचारवाळी महोटी यात्रा छे. ॥ ५० ॥

कृत्वोपवासं दिवसे निशीथेऽतिथिमादरात् । भोजयित्वा विधातव्यं पारणं पुण्यकारणम् ॥ ५१ ॥

अन्वयः—दिवसे उपवासं कृत्वा निशीथे आदरात् अतिथिं भोजयित्वा पुण्यकारणं पारणं विधातव्यं. ॥ ५१ ॥

अर्थः—दिवसे उपवास करीने मध्यरात्रिए आदरपूर्वक अतिथिने जमाडी पुण्यना कारणरूप पारणुं करवुं. ॥ ५१ ॥

तदीदृक्षोपवासानां पारणायोद्यमस्पृशाम् । त्वं भवातिथिरस्माकमाकस्मिकसमागमः ॥ ५२ ॥

अन्वयः—तत् ईदृक्षोपवासानां पारणाय उद्यमस्पृशां अस्माकं आकस्मिक समागमः त्वं अतिथिः भव? ॥ ५२ ॥

अर्थः—माटे आवी रीतना उपवासवाळा अने पारणामाटे तैयार थयेला एवा जे अमो, तेओनो अकस्मात आवी पहोंचेलो तुं अतिथि था? ॥ ५२ ॥

स जगौ नेह भुंजेऽहमंहःकारिणि पारणे । रजन्यां भोजनं न स्याद्युक्तमुक्तमिदं यतः ॥ ५३ ॥

अन्वयः—सः जगौ अंहः कारिणि इह पारणे अहं न भुंजे, यतः रजन्यां भोजनं न स्यात्, इदं युक्तं उक्तं. ॥ ५३ ॥

अर्थः--( त्यारे ) तेणे कह्युं के, पापाचरणवाळां आ पारणामां हुं जमवानो नथी, केमके रात्रिए भोजन कराय नही, एवा ते (शास्त्रोमां) सत्य कहेली छे. ॥ ५३ ॥

उपवासेऽत्र जायेत गुणो गुञ्जासमो न वा । ध्रुवं दोषस्तु दोषायां भोजने भूधराधिकः ॥ ५४ ॥

अन्वयः—अत्र उपवासे गुंजासमः गुणः जायेत वा न, दोषायां भोजने दोषः तु ध्रुवं भूधर अधिकः. ॥ ५४ ॥

अर्थः-आ उपवासथी चणोठी जेटलो गुण तो थाय अथवा न पण थाय, परंतु रात्रिभोजनथी दोषतो खरेखर पर्वतथी पण अधिकछे.

उपवासोऽप्यसौ न स्याद्यत्रैवं निशि भुज्यते । धर्मशास्त्रेष्वहोरात्राभोजने स हि कीर्त्यते ॥ ५५ ॥

अन्वयः-यत्र एवं निशि भुज्यते, असौ उपवासः अपि न स्यात्, हि धर्मशास्त्रेषु अहोरात्रअभोजने सः कीर्त्यते. ॥ ५५ ॥

अर्थः—ज्यां आवीरीते रात्रिए भोजन कराय, ते उपवास पण न होइ शके, केमके धर्मशास्त्रोमां दिवसे अने रात्रिए भोजन न करवाथीज उपवास कहेलो छे. ॥ ५५ ॥

धर्मशास्त्रविरुद्धं ये तपः कुर्वन्ति दुर्धियः । ते यान्ति दुर्गतिं धूर्ताः कूटद्रव्यकृतो यथा ॥ ५६ ॥

अन्वयः—ये धर्मशास्त्रविरुद्धं तपः कुर्वंति, ते दुर्धियः, यथा कूटद्रव्य कृतः धूर्ताः दुर्गतिं यांति. ॥ ५६ ॥

अर्थः—जेओ धर्मशास्त्रथी विपरीत तप करे छे. ते दुर्बुद्धिओ खोटा सिक्का पाडनारा धूर्तोनी पेठे दुर्गतिमां जाय छे. ॥ ५६ ॥

तेऽप्यशंसन्नसावेव देवस्यास्य व्रते विधिः । युक्तैरपि न शास्त्रोक्तैर्विरच्यास्य विचारणा ॥ ५७ ॥

अन्वयः—ते अपि अशंसन्, अस्य देवस्य व्रते असौ एव विधिः, युक्तैः अपि शास्त्र उक्तैः अस्य विचारणा न विरच्या. ॥५७॥

अर्थः—ते यात्रालुओए पण कह्युं के, आ देवना व्रतमां एज विधि छे. माटे सत्य एवां पण शास्त्रोनां वचनो वडे आ संबंधि विचार करवानो होयज नही. ॥ ५७ ॥

अवश्यमतिथिं कंचिद्भोजयित्वाद्य भुज्यते । इति तद्दर्शनेऽस्माकं रजनिर्विपुलाऽजनि ॥ ५८ ॥

अन्वयः—अद्य अवश्यं कंचित् अतिथिं भोजयित्वा भुज्यते, इति तत् दर्शने अस्माकं विपुला रजनिः अजनि. ॥ ५८ ॥

अर्थः–आजे अवश्य कोइक अतिथिने जमाडीने (अमारे) जमवानुं छे, माटे तेनी राह जोवामां अमोने घणी रात्रि व्यतीत थइ छे.

तत्तूर्णं पारणेऽस्माकमस्मिन्भव पुरःसरः । इत्युक्त्वोत्थाय ते सर्वे तस्य पाणिपदेऽलगन् ॥ ५९ ॥

अन्वयः—तत् अस्माकं अस्मिन् पारणे (त्वं) पुरःसरः भव? इति उक्त्वा ते सर्वे उत्थाय तस्य पाणिपदे अलगन्. ॥ ५९ ॥

अर्थः—माटे अमारां आ पारणामां तुं अग्रेसर था? एम कही ते सघळा यात्राळुओ उठीने तेने हाथे पगे लाग्या. ॥ ५९ ॥

पुण्येशः केशवश्चैनमप्यवाजीगणद्गणम् । एकस्तदैव यक्षाङ्गाद् भीष्माङ्गो निर्ययौ नरः ॥ ६० ॥

अन्वयः—पुण्येशः केशवः च एनं गणं अपि अवाजीगणत्, तदा एव एकः भीष्मांगः नरः यक्ष अंगात् निर्ययौ. ॥ ६० ॥

अर्थः—(परंतु) ते पुण्यशाली केशवे तो ते समुदायनी पण अवगणना करी, तेज वखते एक भयंकर शरीरवाळो पुरुष ते यक्षना

शरीरमांथी (बहार निकळ्यो.) ॥ ६० ॥

रे दूषयसि मे धर्मं मद्भक्तानवमन्यसे । भुंक्ष्व शीघ्रं न चेन्मुण्डं शतखण्डं करोमि ते ॥ ६१ ॥

अन्वयः-रे ! मे धर्मं दूषयसि मद्भक्तान् अवमन्यसे, शीघ्रं भुंक्ष्व ? न चेत् ते मुंडं शतखंडं करोमि. ॥ ६१ ॥

अर्थः—अरे ! (तुं) मारा धर्मने दूषित करे छे! तथा (आ) मारा भक्तोनी अवगणना करे छे ! तुरत भोजन कर ? नहितर तारा मस्तकना सेंकडो गमे टुकडा करी नाखुं छुं. ॥ ६१ ॥

इत्याक्षिप्य गिरा तीक्ष्णरूक्षया मंक्षु केशवम् । सोऽयमुद्गमयामास मुद्गरं विकरालदृक् ॥ ६२ ॥

अन्वयः—इति तीक्ष्णरूक्षया गिरा मंक्षु केशवं आक्षिप्य विकरालदृक् सः अयं मुद्गरं उद्गमयामास ॥ ६२ ॥

अर्थः-एवी रीते आकरां अने निर्दय वचनथी तुरत (ते) केशवने धमकावीने भयंकर आंखोवाळो ते पुरुष मुद्गर उगामवा लाग्यो.

हसन्हंसानुजोऽथाह किं क्षोभयसि यक्षमाम् । भवान्तरोद्भवद्भूरिभाग्यर्द्धेर्मृत्युभीः क्व मे ॥ ६३ ॥

अन्वयः—अथ हंसानुजः हसन् आह, (हे) यक्ष! मां किं क्षोभयसि ? भवांतर उद्भवत् भाग्य ऋद्धेः मे मृत्युभीः क्व? ।। ६३ ।।

अर्थः—त्यारे हंसनो न्हानो भाइ ते केशव हसतो थको बोलवा लाग्यो के, भवांतरमां उत्पन्न थती छे, सौभाग्यनी समृद्धि जेने, एवा मने ते मरणनो भय क्यांथी होय ? ।। ६३ ।।

**आचचक्षेऽन्तरिक्षेऽथ यक्षः स्वान्करानिति । एतद्धर्मगुरुर्धृत्वानीय वध्योऽस्य पश्यतः ।। ६४ ।।**

अन्वयः—अथ यक्षः अंतरिक्षे स्वान् किंकरान् इति आचचक्षे, एतत् धर्मगुरुः धृत्वा आनीय अस्य पश्यतः वध्यः. ।।६४।।

अर्थः—पछी ते यक्षे आकाशमां रहेला पोताना नोकरोने एम कह्युं के, आ केशवना धर्मगुरुने अहीं पकडी लावी, तेना देखतांज (तमारे) तेने मारी नाखवो. ।। ६४ ।।

**अथाकाशे कशापाशभृद्भिस्तत्किंकरैर्धृतम् । आर्तघोषमृषिं धर्मघोषमैक्षत केशवः ।। ६५ ।।**

अन्वयः—अथ आकाशे कशापाशभृद्भिः तत्किंकरैः धृतं आर्त घोषं धर्म घोषं ऋषिं केशवः ऐक्षत. ।। ६५ ।।

अर्थः—पछी आकाशमां चाबुक तथा पाशवाळा एवा ते यक्षना नोकरोए पकडेला, अने दुःखथी पोकार करता एवा ते धर्मघोष मुनिराजने केशवे जोया. ॥ ६५ ॥

**स्वं शिष्यं भोजयेदानीं त्वां वा हन्मि शठं हठात् । इत्युक्तस्तेन यक्षेण मुनीशः केशवं जगौ ॥ ६६ ॥**

अन्वयः—स्वं शिष्यं इदानीं भोजय ? वा त्वां शठं हन्मि, इति तेन यक्षेण उक्तः मुनीशः केशवं जगौ. ॥ ६६ ॥

अर्थः–तारा शिष्यने आ वखते जमाड? नहितर तने लुच्चाने मारुं छुं, एवी रीते ते यक्षे कहेवाथी ते मुनिराज केशवने कहेवालाग्या के,

**अप्यकृत्यं सृजेद्देवगुरुसङ्घकृते कृती । मामी मामीदृशा घ्नन्तु त्वद्गुरुं कुरु भोजनम् ॥ ६७ ॥**

अन्वयः—कृती देव गुरु संघकृते अकृत्यं अपि सृजेत्, ईदृशाः अमी त्वद्गुरुं मां मा घ्नंतु, भोजनं कुरु? ॥ ६७ ॥

अर्थः—डाह्यो माणस देव, गुरु तथा संघने अर्थे अकार्य पण करे, ( वळी ) आवा आ यक्षना नोकरो तारा गुरु एवा मने न मारे तो ठीक, माटे तुं भोजन कर ? ॥ ६७ ॥

धर्माख्यानेऽपि यो वक्ति विधिमन्यापदेशतः। सत्त्वी मृत्युभिया दत्तां स पापेऽनुमतिं कुतः ॥ ६८ ॥
तन्नूनं मद्गुरुर्नायमियं मायास्य मायिनः। इति ध्यात्वाथ मौनेन यशोधनसुतः स्थितः॥ ६९ ॥ युग्मम् ॥

अन्वयः—यः धर्मआख्याने अपि अन्यअपदेशतः विधिं वक्ति, सः सत्त्वी मृत्युभिया पापे अनुमतिं कुतः दत्तां ? ॥ ६८ ॥ तत् नूनं अयं मद्गुरुः न, इयं अस्य मायिनः माया, इति ध्यात्वा अथ यशोधनसुतः मौनेन स्थितः. ॥ ६९ ॥ युग्मं ॥

अर्थः—जे मुनि धर्मकथामां पण बीजाना मिषथी विधिमार्गनी प्ररूपणा करे छे, एवा ते बहादूर मुनिराज मृत्युना डरथी पाप कार्यमां अनुमति केम आपी शके ? ॥ ६८ ॥ माटे खरेखर आ मारा गुरु नथी, आ (सघळी) आ कपटी यक्षनी मायाजाळ छे, एम विचारी यशोधन शेठनो पुत्र ते केशव मौन रह्यो. ॥ ६९ ॥ युग्मं ॥

मुनौ मुद्गरमुद्यम्य त्वद्गुरुं हन्मि भुंक्ष्व वा। इति कोपकरालाक्षो जगौ यक्षोऽथ केशवम् ॥ ७० ॥

अन्वयः—अथ कोपकरालाक्षः यक्षः मुनौ मुद्गरं उद्यम्य त्वद्गुरुं हन्मि, वा भुंक्ष्व ! इति केशवं जगौ. ॥ ७० ॥

अर्थः—पछी क्रोधथी भयंकर आंखवाळो ( ते ) यक्ष ( ते ) मुनिमते मुद्गर उगामीने, तारा ( आ ) गुरुने मारुं छुं, नहितर तुं भोजन कर ! एम केशवने कहेवा लाग्यो. ॥ ७० ॥

सोऽपि व्याचष्ट रे मायन्ममायं न गुरुः स हि । तादृक्षचारुचारित्रपात्रं न त्वादृशां वशः ॥७१॥

अन्वयः—सः अपि व्याचष्ट, रे मायिन् ! अयं मम गुरुः न, हि तादृक्ष चारु चारित्र पात्रं सः त्वादृशां वशः न. ॥ ७१ ॥

अर्थः-(त्यारे) ते केशवे पण कह्युं के, अरे! कपटी ! आ मारा गुरु नथी, केमके तेवा उत्कृष्ट चारित्रवाळा ते तारा जेवाने वश न थाय.

त्वद्गुरुस्त्वद्गुरुः सोऽस्मि कृपाब्धे भुङ्क्ष्व रक्ष माम् । इत्यारटन्नथ मुनिस्तन्मुद्गरहतोऽपतत् ॥७२॥

अन्वयः-अथ सः त्वद्गुरुः त्वद्गुरुः अस्मि हे कृपाब्धे! भुंक्ष्व? मां रक्ष? इति आरटन् मुनिः तन्मुद्गरहतः अपतत्. ॥७२॥

अर्थः--पछी ते (हुं) तारो गुरु, तारो गुरु छुं. एम बूमो मारता ते मुनि ते मुद्गरथी घायेल थइ (नीचे) पड्या. ॥ ७२ ॥

तं व्यसुं वीक्षमाणस्य केशवस्याग्रतस्ततः । एत्यादत्त गिरं यक्षो मुद्गरस्त्रमिभीषणः ॥ ७३ ॥

अन्वयः-ततः व्यसुं तं वीक्षमाणस्य केशवस्य अग्रतः एत्य मुद्गरभ्रमिभीषणः यक्षः गिरं आदत्त ॥ ७४ ॥

अर्थः-पछी प्राणरहित थयेला ते गुरुने जोता एवा (ते) केशवनी आगळ आवीने मुद्गरना भ्रमणथी भयंकर थयेलो (ते) यक्ष बोलवा लाग्यो के, ॥ ७४ ॥

**सम्प्रत्यश्नासि चेत्तत्ते जीवयामि गुरुं जवात् । वितरामितरामृद्धिं प्राज्यं राज्यं च किंचन ॥ ७५ ॥**

अन्वयः-चेत् संप्रति अश्नासि, तत् ते गुरुं जवात् जीवयामि, च ऋद्धिं किंचन प्राज्यं राज्यं वितरामितरां ॥ ७५ ॥

अर्थः-जो आ वखते तुं भोजन करे, तो तारा (आ) गुरुने तुरत (हुं) जीवता करुं, तथा (तने) समृद्धि अने केटकुंक सुंदर राज्य पण आपुं. ॥ ७५ ॥

**एतन्मुद्गरनिर्घातनिर्विघ्नगगनक्रमः । पथि कीनाशहर्म्यस्य पथिकीक्रियसेऽन्यथा ॥ ७६ ॥**

अन्वयः—अन्यथा एतत् मुद्गर निर्घात निर्विघ्न गगन क्रमः कीनाश हर्म्यस्य पथि पथिकी क्रियसे. ॥ ७६ ॥

अर्थः—नहितर आ मुद्गरना महारथी सुगम थनारुं छे आकाशगमन जेनुं (एवा तने) यमना घरने मार्गे रवानो करीश.।। ७६ ।।

ततः पुण्यसुधासिन्धुहंसो हंसानुजो हसन् । दशनांशुमिषप्रेक्ष्यमाणसत्त्वगुणो जगौ ॥ ७७ ॥

अन्वयः—ततः पुण्य सुधा सिंधु हंसः दशनांशु मिष प्रेक्ष्यमाण सत्त्वगुणः हंसानुजः हसन् जगौ. ।। ७७ ।।

अर्थः—पछी पुण्यरूपी अमृतनी नदीमां हंससरखो, तथा दांतोना किरणोना मिषथी देखातो छे सत्त्वगुण जेनो एवो हंसनो न्हानो भाइ केशव हसतो थको कहेवा लाग्यो के, ।। ७७ ।।

नैवायं मद्गुरुः किंच त्वया जीवन्ति चेन्मृताः । तदमीषां स्वभक्तानां सर्वाञ्जीवय पूर्वजान् ॥ ७८ ॥

अन्वयः—अयं मद्गुरुः न एव, किं च त्वया चेत् मृताः जीवंति, तत् अमीषां स्वभक्तानां सर्वान् पूर्वजान् जीवय? ।। ७८ ।।

अर्थः—आ मारा गुरुज नथी, वळी तुं जो मृत्यु पामेलाओने जीवाडी शकतो हो, तो आ तारा भक्तोना (मृत्यु पामेला)सघळा पूर्वजोने जीवता कर ? ।। ७८ ।।

कि राज्यदानशक्तेन नामी राज्यभृतः कृताः। किं भापयसि मां मृत्योः का भीर्नियतभाविनः ॥ ७९ ॥

अन्वयः—राज्यदान शक्तेन (त्वया)अमी राज्यभृतः किं न कृताः ? मां किं भापयसि ? नियतभाविनः मृत्योः का भीः? ७९

अर्थः—( वळी ) राज्य आपवानी शक्तिवाळा एवा तें आ ( तारा भक्तोने ) राज्यना मालीक केम न कर्या ? मने शामाटे डरावे छे ? निश्चयें थनारा मृत्युथी शुं डरवानुं छे ? ॥ ७९ ॥

एवं नियमवाग्दक्षं यक्षोऽयं क्षान्तिमानिव। प्रहृष्टो हृष्टरोमालिः समालिंग्य जगाद तम् ॥ ८० ॥

अन्वयः—एवं नियमवाग्दक्षं तं क्षांतिमान् इव प्रहृष्टः हृष्टरोमालिः अयं यक्षः समालिंग्य जगाद. ॥ ८० ॥

अर्थः—एवी रीते (पोताना) नियम तथा वचनमां चतुर एवा ते केशवने क्षमावाननी पेठे खुशी थयेला, तथा रोमांचित थयेला ते यक्षे भेटीने कह्युं के, ॥ ८० ॥

साधु मित्र धियां पात्र न स्यादेष गुरुस्तव। मृता मया न जीवन्ति नैव राज्यं च दीयते ॥ ८१ ॥

अन्वयः-- (हे) मित्र! (हे) धियां पात्र! साधु, एषः तव गुरुः न स्यात्, च मृताः न जीवंति, मया राज्यं न एव दीयते.

अर्थः--हे मित्र! हे बुद्धिना भंडार! ( तारुं कहेवुं ) सत्य छे, आ तारा गुरु न संभवी शके, वळी मरेला जीवता थता नथी, तेम माराथी कोइने पण राज्य आपी शकायज नही. ॥ ८१ ॥

इत्थमुक्तेऽथ यक्षेन्द्रे सहासं सहसोत्थितः । मुनिरूपं परित्यज्य खं ययौ यक्षकिंकरः ॥ ॥ ८२ ॥

अन्वयः-अथ यक्षेंद्रे इत्थं उक्ते यक्षकिंकरः सहासं सहसा उत्थितः मुनिरूपं परित्यज्य खं ययौ. ॥ ८२ ॥

अर्थः--हवे ते यक्षेंद्रे एवी रीते कह्याबाद यक्षनो ते नोकर हास्यसहित एकदम उभो थयो, तथा मुनिनुं स्वरूप तजीने आकाशमां उडी गयो ॥ ८२ ॥

विस्मयस्मेरवक्त्राक्षमनया चित्रमायया । उवाचाचलचित्तेशं केशवं यक्षपुङ्गवः ॥ ८३ ॥

अन्वयः-अनया चित्र मायया विस्मय स्मेर वक्त्राक्षं अचलचित्तेशं केशवं यक्षपुंगवः उवाच. ॥ ८३ ॥

अर्थः-आ विचित्र प्रकारनी मायाथी आश्चर्य सहित विकस्वर मुख तथा आंखोवाळा, अने निश्चल मनवाळाओमां अग्रेसर एवा ते केशवने ते यक्षराज कहेवा लाग्यो के, ॥ ८३ ॥

**खिन्नः सप्तोपवासैस्त्वं क्लिन्नश्चाध्वविहारतः । विश्रम्येह निशामह्नि सहैभिः कुरु पारणम् ॥ ८४ ॥**

अन्वयः—त्वं सप्तोपवासैः खिन्नः, च अध्वविहारतः क्लिन्नः, इह निशां विश्रम्य अह्नि एभिः सह पारणं कुरु? ॥ ८४ ॥

अर्थः—तुं सात उपवासोथी क्षीण थयो छुं, तथा मुसाफरीथी पण थाकी गयो छुं, माटे अहीं रात्रि रहीने दिवस उग्ये आ यात्रालुओनी साथे पारणुं करजे. ॥ ८४ ॥

**इत्युक्त्वादर्शयत्तस्मै स तल्पं शक्तिकल्पितम् । केशवोऽस्मिन्विशश्राम श्रेयसीव यशश्चयः ॥ ८५ ॥**

अन्वयः—इति उक्त्वा सः तस्मै शक्तिकल्पितं तल्पं अदर्शयत्, श्रेयसि यशश्चयः इव केशवः अस्मिन् विशश्राम. ॥ ८५ ॥

अर्थः—एम कहीने ते यक्षे ते केशवने पोतानी शक्तिथी बनावेली शय्या देखाडी. ( त्यारे ) कल्याणमां जेम यशनो समूह

(विश्राम पामे) तेम ते केशवे ते शय्यापर विश्राम लीधो. ॥ ८५ ॥

**यक्षयात्राजनैर्यक्षादिष्टैः संवाहितक्रमः । केशवोऽकलयन्निद्रामुन्निद्रसुकृतक्रमः ॥ ८६ ॥**

अन्वयः—यक्षादिष्टैः यक्ष यात्रा जनैः संवाहित क्रमः उन्निद्र सुकृत क्रमः केशवः निद्रां अकलयत्. ॥ ८६ ॥

अर्थः—यक्षे आज्ञा करेला ते यात्रालुओवडे दबाता पगोवाळो, (अर्थात् ते यात्रालुओ तेना पगनी चंपी करवा लाग्या) तथा उदय पामेली छे पुण्यपरंपरा जेनी, एवो ते केशव (त्यां) निद्रा करवा लाग्यो. ॥ ८६ ॥

**विभावरी विभातेयं निद्रा विद्राव्यतामिति । तं प्रत्यक्षो जगौ यक्षो निद्रातन्द्रालुलोचनम् ॥ ८७ ॥**

अन्वयः—इयं विभावरी विभाता, निद्रा विद्राव्यतां, इति निद्रा तंद्रालु लोचनं तं प्रत्यक्षः यक्षः जगौ. ॥ ८७ ॥

अर्थः आ रात्रि खलास थइ छे, माटे (तुं) निद्रा उडाड? एवी रीते (हजु) निद्राथी घेराती आंखवाळा ते केशवने ते यक्षे प्रत्यक्षथइनेकह्युं.

**अथ निद्रादरिद्राक्षो विश्वं वीक्ष्य दिनोज्ज्वलम् । नभोऽर्कभूषितं चेति चिन्तयामास केशवः ॥ ८८ ॥**

अन्वयः--अथ निद्रा दरिद्राक्षः केशवः विश्वं दिनोज्ज्वलं, च नभः अर्क भूषितं वीक्ष्य इति चिंतयामास. ॥ ८८ ॥

अर्थः-त्यारे निद्राथी घेरा॰ती आंखवाळा (ते)केशवे जगतने दिवसथी उज्ज्वल थयेलुं, तथा आकाशने सूर्यवडे शोभितुं थयेलुं जोइने एम विचार्युं के, ॥ ८८ ॥

**ब्राह्म एव मुहूर्तेऽहमन्वहं कृत्यनिष्ठधीः । स्वयं यामि त्रियामान्तयामसुप्तोऽप्यनिद्रताम् ॥ ८९ ॥**

अन्वयः-कृत्यनिष्ठधीः अहं त्रियामा अंतयाम सुप्तः अपि अन्वहं ब्राह्मे एव मुहूर्ते स्वयं अनिद्रतां यामि. ॥ ८९ ॥

अर्थः-नित्यकर्ममां निश्चल बुद्धिवाळो हुं रात्रिने छेल्ले पहोरे सुवा छतां पण हमेशां बेघडी रात्रि बाकी होय त्यारे पोतानी मेळेज निद्रारहित थाउं छुं. ॥ ८९ ॥

**अह्नि यामार्धमात्रेऽपि त्रियामार्धशयोऽप्यहम् । स्वयं नाद्य विनिद्रत्वमासदं किमिदं किल ॥ ९० ॥**

अन्वयः-त्रियामा अर्धशयः अपि, यामार्धमात्रे अपि अह्नि अद्य अहं स्वयं विनिद्रत्वं न आसदं, किल इदं किं? ॥ ९० ॥

अर्थः—अर्धी रात्रिए सूतां छतां पण, तेमज अर्धो पहोर दिवस चड्या छतां पण आजे हुं मारी पोतानी मेळे जाग्यो नही, माटे खरेखर आ ते शुं (कहेवाय?) ॥ ९० ॥

दिवसेऽप्यद्य किं निद्राविवशे मे दृशौ भृशम् । किं नान्तः पद्मवीकाशसुरभिः श्वासमारुतः ॥ ९१ ॥

अन्वयः—अद्य दिवसे अपि मे दृशौ भृशं निद्राविवशे किं? अंतः श्वासमारुतः पद्मवीकाश सुरभिः किं न? ॥ ९१ ॥

अर्थः—(वळी) आजे दिवसे पण मारी आंखो निद्राथी वधारे केम घेराय छे? तथा अंदरना श्वासनो वायु विकस्वर थयेलां कमल सरखो सुगंधी केम नथी? ॥ ९१ ॥

इति शङ्काजुषं यक्षस्तमूचे मुञ्च जिह्मताम् । प्रातःकृत्यानि कृत्वाशु भूहार कुरु पाणम् ॥ ९२ ॥

अन्वयः—इति शंकाजुषं तं यक्षः ऊचे, (हे) भूहार! जिह्मतां मुंच ! आशु प्रातः कृत्यानि कृत्वा पारणं कुरु? ॥ ९२ ॥

अर्थः-एवीरीते शंकाशील थयेला ते केशवने यक्षे कह्युं के, (हे) पृथ्वीने शोभावनारा केशव ! (हवे) आळस तजी दे? तथा

तुरत प्रभातनुं नित्यकर्म करीने पारणुं कर? ॥ ९२ ॥

**सोऽप्युवाच न वञ्च्योऽहं यक्ष दक्षतया तव । विशालैव निशाद्यापि त्वन्मायोत्थमहर्महः ॥ ९३ ॥**

अन्वयः-सः अपि उवाच, (हे) यक्ष! तव दक्षतया ! अहं वंच्यः न, अद्य अपि निशा विशाला एव, अहर्महः त्वन्मायोत्थं ॥९३॥

अर्थः—(त्यारे) ते केशवे पण कह्युं के, (हे) यक्ष ! तारी कपटजाळथी हुं ठगाउं तेम नथी, हजु पण रात्रि घणीज छे, (आ) दिवसनुं तेज तो तारी (आ बनावटी) मायाथी थयेलुं छे. ॥ ९३ ॥

**इत्यस्य जल्पतो मूर्ध्नि पुष्पवृष्टिर्दिवोऽपतत् । स त्वं धीमञ्जय जयेत्यभून्नभसि भारती ॥ ९४ ॥**

अन्वयः-इति जल्पतः अस्य मूर्ध्नि दिवः पुष्पवृष्टिः अपतत् (हे) धीमन् ! सः त्वं जय ? जय ? इति नभसि भारती अभूत्.

अर्थः—एम बोलता एवा आ केशवना मस्तकपर आकाशमांथी पुष्पोनी वृष्टि थइ, तथा (हे) बुद्धिवान् केशव ! ते तुं जय पाम ? जय पाम ? एम आकाशवाणी थइ. ९४ ॥

पुरः सुरमसौ कंचिच्चश्वदर्चिषमैक्षत । न यक्षं न च यक्षौको न च यक्षार्चकान्वने ॥ ९५ ॥

अन्वयः-असौ पुरः चंचत् अर्चिषं कंचित् सुरं ऐक्षत, च वने न यक्षं, च न यक्षओकः, यक्षअर्चकान्. ॥ ९५ ॥

अर्थः-(वळी)तेणे (पोतानी)आगळ चळकता तेजवाळा कोइक देवने दीठो, परंतु वनमां न यक्षने, के न यक्षना मंदिरने, के यक्षना पूजारी एवा ते यात्राळुओने पण न जोया. ॥ ९५ ॥

स्मितांशुकुसुमश्रेणिश्रृङ्गारसुरभीकृतम् । मुखश्रीलक्षितप्रीतिरित्यादत्त वचः स च ॥ ९६ ॥

अन्वयः-च मुख श्री लक्षित प्रीतिः सः स्मित अंशु कुसुम श्रेणि श्रृंगार सुरभीकृतं इति वचः आदत्त. ॥ ९६ ॥

अर्थः-वळी मुखनी शोभाथी देखाडेली छे प्रीति जेणे एवो ते देव हास्यना किरणोरूपी पुष्पोनी माळाथी अलंकृत तथा सुगंधि थयेलु वचन बोल्यो के, ॥ ९६ ॥

एकः पुण्यवतां रत्नं निःसपत्नगुणो भवान् । भवादृशां प्रसूत्यैव रत्नगर्भा बभूव भूः ॥ ९७ ॥

अन्वयः-पुण्यवतां रत्नं, निःसपत्नगुणः भवान् एकः, भवादृशां प्रसूत्या एव भूः रत्नगर्भा बभूव. ॥ ९७ ॥

अर्थः-पुण्यवानोमां रत्नसमान, तथा अनुपम गुणोवाळो तुं एकज छो, तथा तारा जेवाओनी हयातिथी (आ) पृथ्वी "रत्नगर्भा" (रत्नोने उत्पन्न करनारी) थयेली छे. ॥ ९७ ॥

शृणु सत्त्वभराश्रान्तस्वान्त वृत्तान्तमांतरम् । मध्येसभमिति प्रोच्चैश्चक्रे शक्रस्तव स्तवम् ॥ ९८ ॥

अन्वयः—(हे) सत्त्व भर अश्रांत स्वांत! आंतरं वृत्तांतं शृणु? मध्येसभं शक्रः प्रोच्चैः तव स्तवं चक्रे. ॥ ९८ ॥

अर्थः—पराक्रमना समूहथी नथी थाकेलुं हृदय जेनुं एवा हे केशव! तुं (मारा) हृदयनो वृत्तांत सांभळ? सभानी अंदर इंद्रे घणीघणी रीते तारी प्रशंसा करी. ॥ ९९ ॥

अहो वरेण्यतारुण्यः पुण्यवान्सुखलालितः । यशोधनस्य वणिजस्तनुजो मनुजोत्तमः ॥ ९९ ॥

रजनीभोजनत्यागात्केशवः क्लेशकोटिभिः । अचलाचलचैतन्यश्चाल्यते नामरैरपि ॥ १०० ॥ युग्मम्॥

अन्वयः—अहो! वरेण्य तारुण्यः, पुण्यवान्, सुख लालितः, मनुजोत्तमः, अचल ।अचल चैतन्यः यशोधनस्य वणिजः तनुजः केशवः अमरैः क्लेशकोटिभिः अपि रजनी भोजन त्यागात् न चाल्यते, ॥ ९९ ॥ १०० ॥ युग्मं ॥

अर्थः—अहो! मनोहर युवावस्थावाळो, पुण्यशाली, सुखमां उछरेलो, मनुष्योमां श्रेष्ठ, अने पृथ्वीनी पेठे निश्चल मनवाळो यशोधन शेठनो पुत्र केशव देवोथी क्रोडोगमे दुःखो अपाया छतां पण (तेना) रात्रिभोजन त्याग नामना व्रतथी चलायमान थइ शके तेम नथी. ॥ ९९ ॥ १०० ॥ युग्मं ॥

तदाकर्ण्य तदा कर्णतप्तत्रपुसमं वचः । स्वभावादाभवादेव देवत्वेऽपि सुखोचिते ॥ १ ॥

दुःखितोऽन्यप्रशंसाभिर्देवः सर्वाभिसारवान् । महर्द्धिर्वह्निनामाहमिहागां त्वां परीक्षितुम् ॥ २ ॥युग्मम्॥

अन्वयः—तदा कर्ण तप्त त्रपुसमं वचः आकर्ण्य सुखोचिते देवत्वे अपि आभवात् एव स्वभावात्॥ १ ॥ अन्य प्रशंसाभिः दुःखितः महर्द्धिः वह्निनामा अहं देवः सर्वाभिसारवान् त्वां परीक्षितुं इह आगां ॥ २ ॥ युग्मं ॥

अर्थः—ते वखते कानमां (रेडेला) तपावेला सीसासरखुं (इंद्रनुं)ते वचन सांभळीने, सुखने लायक एवा देवपणामां पण छेक जन्मथी स्वभावेज ॥ १ ॥ बीजानी प्रशंसाथी दुःख पामतो (ईर्षालु थयेलो) महोटी समृद्धिवाळो हुं वह्नि नामनो देव (मारा) सघळा सेवको सहित तारी परीक्षा करवाने अहीं आव्यो छुं. ॥ २ ॥ युग्मं ॥

**त्रैलोक्यचालनोत्तालशक्तिनापि न ते मया । रोमाप्यचालि नियमाद्वीरः कोऽस्तु भवानिव ॥ ३ ॥**

अन्वयः—त्रैलोक्य चालन उत्ताल शक्तिना अपि मया ते रोम अपि नियमात् न अचालि, भवान् इव कः वीरः अस्तु ॥ ३ ॥

अर्थः—त्रणे लोकने उथलावी पाडवानी महान शक्तिवाळो एवो पण हुं तारां रुंवाडांने पण नियमथी चलावी शक्यो नहीं, माटे खरेखर तारा समान (बीजो) कोण वीरपुरुष होइ शके ? ॥ ३ ॥

**वह्निना परितप्तोऽपि मूलोत्तरगुणाग्रणीः । सुवर्ण इव सद्वर्णभूमिर्भ्रातर्भवानभूत् ॥ ४ ॥**

अन्वयः—(हे) भ्रातः! भवान् सुवर्णः इव वह्निना परितप्तः अपि मुलोत्तरगुणाग्रणीः सद्वर्णभूमिः अभूत्. ॥ ४ ॥

अर्थः-(वळी) हे भाइ! तुं तो सुवर्णनी पेठे अग्निवडे (मारावडे) बहु तपाव्या छतां पण स्वाभाविक उत्तम गुणोवडे अग्रेसर थयोथको (लीधेल नियममां निश्चल रह्योथको) उत्तम रंगना स्थान सरखो (उत्तम जातिना स्थानरूपज) रह्यो. ॥ ४ ॥

यक्षादिक्षोभसंरम्भो यः कश्चिद्विदधे मया । तं मयि प्रणयं तन्वन् त्वं सहस्व सहस्व भोः ॥५॥

अन्वयः-यः कश्चित् यक्षादिक्षोभसंरंभः मया विदधे, तं मयि प्रणयं तन्वन् भोः त्वं सहस्व? सहस्व? ॥ ५ ॥

अर्थः-जे कंइ यक्षनी विकुर्वणा आदिकथी (तने)डरावावाने में धांधल करी, ते माटे मारापर कृपा करी, तारे क्षमा करवी.॥५॥

किं च याचस्व किंचिन्मां क्व वा याञ्चा भवादृशाम् । त्वदङ्गस्पृक्पयःसिक्तो रोगी नीरुग्भविष्यति ॥६॥

अन्वयः—किं च मां किंचित् याचस्व? वा भवादृशां यांचा क्व? त्वदंगस्पृक् पयः सिक्तः रोगी नीरुग् भविष्यति ॥ ६ ॥

अर्थः—वळी (तुं) मारीपासे कंइक माग? अथवा तारा जेवाने याचना क्यांथी संभवे? तारां शरीरना स्पर्शवाळां जलथी स्नान करेलो रोगी माणस रोगरहित थशे. ॥ ६ ॥

यच्च किंचित्कदाचित्त्वमातुरश्चिन्तयिष्यसि । भविष्यत्याशु तत्पुण्यशुभानां किमु दुर्लभम् ॥ ७ ॥

अन्वयः—च आतुरः त्वं कदाचित् यत् किंचित् चिंतयिष्यसि, तत् आशु भविष्यति, पुण्यशुभानां किमु दुर्लभं? ॥ ७ ॥

अर्थः-वळी अणीने समये तुं कोइक वखते जे कंइ चिंतवीश, ते (कार्य) तुरत थशे, केमके पुण्यशालिओने शुं दुर्लभ छे? ॥७॥

कस्यापि नगरस्यान्ते त्वां मुञ्चाम्यधुना पुनः । क्लेशावेशाय तुच्छापि त्वादृशामंह्रिचारिका ॥ ८ ॥

अन्वयः-अधुना पुनः त्वां कस्य अपि नगरस्य अंते मुंचामि, त्वादृशां तुच्छा अपि अंह्रि चारिका क्लेशावेशाय. ॥ ८ ॥

अर्थः-हवे तो तने कोइक नगरनी नजदीक मूकुं, केमके तारा जेवाना चरणोनी स्वल्प सेवा पण (अथवा तारा जेवाना स्वल्प पगलां पण) दुःखनो नाश करनारा छे. ॥ ८ ॥

इत्युक्त्वा द्युतिदीप्ताशस्तिरोधत्त सुरोत्तमः । प्रान्ते पुरस्य कस्यापि स्वमपश्यच्च केशवः ॥ ९ ॥

अन्वयः-इति उक्त्वा द्युति दीप्त आशः सुरोत्तमः तिरोधत्त, च केशवः स्वं कस्य अपि पुरस्य प्रांते अपश्यत्. ॥ ९ ॥

अर्थः—एम कहीने (पोतानी) कांतिथी तेजस्वी करेल छे दिशाओ जेणे, एवो उत्तम देव अदृश्य थइ गयो. अने ते केशव पोताने कोइक नगरनी पासे (उभेलो) जोवा लाग्यो ॥ ९ ॥ चतुर्भिः कलापकं ॥

प्राचीनाचलचूलाग्रचुम्बिन्यम्बुजबान्धवे । कृतप्रातःक्रियोऽथायं प्राचलत्पुरमीक्षितुम् ॥ १० ॥

अन्वयः-अथ अंबुज बांधवे प्राचीन अचल चूला अग्र चुंबिनि कृत प्रातः क्रियः अयं पुरं ईक्षितुं प्राचलत् ॥ १० ॥

अर्थः-पछी सूर्य ज्यारे पूर्वाचलना शिखरना अग्र भागपर आव्यो, (अर्थात् सूर्योदय थयो) त्यारे प्रभातनी नित्यक्रिया करीने ते केशव ते नगर जोवामाटे (आगळ) चालवा लाग्यो. ॥ १० ॥

धर्माख्यानगिराहूतः स जीमूतरवश्रिया । आरामे वामतः सूरिं सूरनामानमानमत् ॥ ११ ॥

अन्वयः—-वामतः आरामे जीमूतरवश्रिया धर्माख्यानगिरा आहूतः सः सूरनामानं सूरिं आनमत्. ॥ ११ ॥

अर्थः-(एवामां) डाबी बाजुए (आवेला) बगीचामां मेघनी गर्जनासरखी शोभती धर्मसंबंधी व्याख्याननी वाणीथी बोलावायेला

एवा ते केशवे (त्यां जइ) सूर नामना आचार्यने वांद्या. ॥ ११ ॥

देशनारसपीयूषरसनप्रसृतश्रुतिः । स व्यक्तवासनस्तत्र युक्तमासनमासदत् ॥ १२ ॥

अन्वयः—देशना रस पीयूष रसन प्रसृत श्रुतिः, व्यक्त वासनः सः तत्र युक्त आसनं आसदत्. ॥ १२ ॥

अर्थः—(ते आचार्य महाराजना) उपदेशना रसरूपी अमृतना स्वादथी विकस्वर थया छे कर्णो जेना, तथा प्रगटरीते (धर्मनी) वासनावाळो ते केशव त्यां योग्य जगाए बेठो. ॥ १२ ॥

पुरस्य तस्य साकेतनाम्नः स्वामी धनञ्जयः । देशनान्ते मुनीशं तं मुदा नत्वा व्यजिज्ञपत् ॥ १३ ॥

अन्वयः—साकेत नाम्नः तस्य पुरस्य स्वामी धनंजयः देशनांते तं मुनिं मुदा नत्वा व्यजिज्ञपत्. ॥ १३ ॥

अर्थः-(पछी) साकेतपुरनामना ते नगरनो स्वामी धनंजय देशनाने अंते ते मुनिराजने हर्षथी वांदीने कहेवा लाग्यो के, ॥१३॥

प्रभो जरापराभूतो व्रतग्रहचिरस्पृहः । अपुत्रः कुत्र राज्यं स्वं न्यस्यामीत्यस्मि दुःखितः ॥ १४ ॥

अन्वयः—(हे) प्रभो! जरापराभूतः, व्रत ग्रह चिर स्पृहः, अपुत्रः स्वं राज्यं कुत्र न्यस्यामि? इति दुःखितः अस्मि. ॥ १४ ॥

अर्थः—हे प्रभु! जरावस्थाए पहोंचेलो, तथा घणा काळथी चारित्र लेवानी इच्छावाळो (हुं) पुत्ररहित होवाथी मारुं (आ) राज्य कोने सोंपुं? ए विचारथी हुं चिंतातुर थयेलो छुं. ॥ १४ ॥

**मत्पुण्येनेव मूर्तेन पुंसा दिव्येन केनचित्। स्वप्ने ममेति शान्तेन निशान्तेऽद्य न्यवेद्यत ॥ १५ ॥**

अन्वयः—अद्य निशांते स्वप्ने मूर्तेन मत्पुण्येन इव केनचित् शांतेन दिव्येन पुंसा मम इति न्यवेद्यत. ॥ १५ ॥

अर्थः—आजे परोढीये स्वप्नमां जाणे देहधारी मारां पुण्येज होय नही? तेम कोइक शांत प्रकृतिवाळा दिव्य पुरुषे मने स्वप्नमां एम जणाव्युं के, ॥ १५ ॥

**प्रातर्देशान्तरादेति यस्ते गुरुपुरः स्थिते। योग्ये तस्मिन्भुवं न्यस्य भव पूर्णमनोरथः ॥ १५ ॥**

अन्वयः—यः प्रातः देशांतरात् एति, ते गुरुपुरः स्थिते तस्मिन् योग्ये भुवं न्यस्य पूर्णमनोरथः भव? ॥ १५ ॥

अर्थः-जे प्रभातमां देशांतरथी आवे, तथा जे तारा गुरुपासे आवीने बेशे, एवा ते योग्य पुरुषने पृथ्वी ( राज्य ) सोंपीने तुं संपूर्ण मनोरथवाळो था ! (अर्थात् तारो चारित्र लेवानो मनोरथ पूर्ण कर !)॥ १५ ॥

**अथास्तनिद्रो निर्माय प्रातःकृत्यमिहागमम् । अपश्यं चैनमायातमाकारख्यातसत्कुलम् ॥ १६ ॥**

अन्वयः—अथ अस्तनिद्रः प्रातः कृत्यं निर्माय इह आगमं, च आकार ख्यात सत्कुलं एनं आयातं अपश्यं. ॥ १६ ॥

अर्थः-पछी निद्रा उड्याबाद प्रातःकाळनुं नित्यकर्म करीने (हुं) अहीं आव्यो, (त्यां तो) जेनो आकारज उत्तम कुल जणावेछे, एवा आ पुरुषने (केशवने अहीं) आवेलो में जोयो. ॥ १६ ॥

**अथादिशद्गुरुर्ज्ञानी केशवस्य शुभात्मनः । वृत्तं निशाशनत्यागनिश्चयामोदसुन्दरम् ॥ १७ ॥**

अन्वयः—अथ ज्ञानी गुरुः शुभ आत्मनः केशवस्य निशा अशन त्याग निश्चय आमोद सुंदरं वृत्त आदिशत्. ॥ १७ ॥

अर्थः-पछी ज्ञानी एवा ते गुरुमहाराजे निर्मल आत्मावाळा एवा ते केशवनुं रात्रिभोजनत्यागनानिश्चयरूपी सुगंधिथी मनोहर

थयेलुं वृत्तांत (ते राजाने) कही संभळाव्युं. ॥ १७ ॥

मम केनोपदिष्टोऽयमिति पृष्टेऽथ भूभुजा । वह्निनामुष्य सत्कर्महृष्टेनेति गुरुर्जगौ ॥ १८ ॥

अन्वयः—अथ मम अयं केन उपदिष्टः? इति भूभुजा पृष्टे अमुष्य सत्कर्महृष्टेन वह्निना इति गुरुः जगौ. ॥ १८ ॥

अर्थः-हवे मने आ केशवने कोणे चींध्यो? एम राजाए पूछवाथी, आना सुकृतथी खुशी थयेला वह्नि नामना देवे (चींध्यो छे) एम गुरुमहाराजे (राजाने) कह्युं. ॥ १८ ॥

इति श्रुत्वा गुरुं नत्वा सत्त्वाधिकगुरुः पुरम् । केशवेन समं प्रीतः प्रविवेश विशां विभुः ॥ १९ ॥

अन्वयः—इति श्रुत्वा गुरुं नत्वा सत्त्वाधिकगुरुः विशां विभुः प्रीतः केशवेन समं पुरं प्रविवेश. ॥ १९ ॥

अर्थः-एम सांभळीने गुरुमहाराजने वांदी पराक्रमथी अधिक भारी थयेलो ते राजा आनंदथी (ते) केशवने साथे लेइ नगरमां आव्यो.

स्वराज्ये केशवं भूमानभ्यषिञ्चन्महोत्सवैः । स्वयं सूरगुरोः पार्श्वे तदैव व्रतन ग्रहीत् ॥ २० ॥

अन्वयः—तदा एव भूमान् स्वराज्ये महोत्सवैः केशवं अभ्यषिंचत्. स्वयं सूरगुरोः पार्श्वे व्रतं अग्रहीत्. ॥ २० ॥

अर्थः—(पछी) तेज वखते राजाए पोताना राज्यपर महोत्सवपूर्वक ते केशवनो राज्याभिषेक कर्यो, अने पोते ( ते ) सूराचार्यपासे दीक्षा लीधी. ॥ २० ॥

**ययौ श्रीकेशवो राजा नन्तुं देवान्विवेकवान् । सामात्यस्तत्र चैत्येषु पताकाभासुरे पुरे ॥ २१ ॥**

अन्वयः—विवेकवान् श्रीकेशवः राजा स अमात्यः पताकाभासुरे तत्र पुरे चैत्येषु देवान् नंतु ययौ. ॥ २१ ॥

अर्थः—पछी विवेकी एवो ते श्रीकेशवराजा मंत्री सहित पताकाओ वडे शोभिता एवा ते नगरमां रहेल देवमंदिरोमां देवोने वांदवा माटे गयो. ॥ २१ ॥

**विहितातुल्यमङ्गल्यः स्वसौधे शुद्धधीर्व्यधात् । दुःस्थितानां स दानेन तारणः पारणस्थितिम् ॥ २२ ॥**

अन्वयः—विहित अतुल्य मंगल्यः, शुद्धधीः, दानेन दुःस्थितानां तारणः सः स्वसौधे पारण स्थितिं व्यधात्. ॥ २२ ॥

अर्थः-करेलां छे अनुपम मंगलकार्यो जेणे, तथा निर्मल बुद्धिवाळा, अने दानवडे दीन जनोने तारनारा, एवा ते केशव राजाए पोताना मेहेलमां (आवीने) पारणुं कर्युं. ॥ २२ ॥

प्रतापाक्रान्तसीमालभूपालः पालयन्प्रजाम् । स राज्यं न्यायनैपुण्यहृष्यन्मन्त्रिजनोऽतनोत् ॥ २३ ॥

अन्वयः—प्रताप आक्रांत सीमाल भूपालः, न्याय नैपुण्य हृष्यत् मंत्रिजनः सः प्रजां पालयन् राज्यं अतनोत्. ॥ २३ ॥

अर्थः—पराक्रमथी जीतेला छे सीमाडाना राजाओने जेणे, तथा न्यायनी चतुराइथी खुशी थता छे मंत्रिलोको जेनाथी, एवो ते केशवराजा प्रजानुं पालन करतो थको राज्य करवा लाग्यो. ॥ २३ ॥

कदाचित्पितुरुत्कण्ठामाप भूपो गवाक्षगः । ददर्श च पथि श्रान्तं भुवि यान्तं यशोधनम् ॥ २४ ॥

अन्वयः—कदाचित् गवाक्षगः भूपः पितुः उत्कंठां आप, च पथि श्रांतं भुवि यांतं यशोधनं ददर्श. ॥ २४ ॥

अर्थः—(पछी) एक दिवसे झरुखामां बेठेलो ते केशवराजा (पोताना) पिताने (मळवानी) उत्कंठा करवा लाग्यो. (एवामां)

मुसाफरीथी थाकी गयेला, तथा जमीनपर चालता एवा यशोधनने (तेणे) जोयो. ॥ २४ ॥

अनुधावत्परिजनप्रकरः सत्वरस्ततः । सौधादुत्तीर्य नृपतिः पितुः पदयुगेऽपतत् ॥ २५ ॥

अन्वयः—अनुधावत्परिजन प्रकरः नृपतिः सत्वरः ततः सौधात् उत्तीर्य पितुः पदयुगे अपतत्. ॥ २५ ॥

अर्थः—( पछी ) पाछळ दोडतो छे परिवारनो समूह जेनो, एवो ते राजा उतावळथी ते मेहेलमांथी उतरीने ( पोताना ) पिताना चरणोमां पड्यो. ॥ २५ ॥

ताद्दग्विभूतिपर्यङ्कोऽप्यद्य रङ्कोपमाश्रयः । कुतः पितरितोऽसीति प्राह च प्रीतिदुःखितः ॥ २६ ॥

अन्वयः—च प्रीतिदुःखितः प्राह, हे पितः ! ताद्दक्विभूतिपर्यंकः अपि अद्य रंक उपमा आश्रयः इतः कुतः असि ? ॥ २६ ॥

अर्थः—पछी प्रेमथी पीडित थयेलो ते केशव राजा एम कहेवा लाग्यो के, हे पिताजी ! तेवा प्रकारनी समृद्धिना तमो पलंग सरखा होवा छतां पण आजे रंक सरखा थइने अहीं क्यांथी आव्या ? ॥ २६ ॥

नन्दनस्य नरेन्द्रत्वपदेन मुदितोऽपि सन् । दुःखाश्रूणि दधद् गेहवार्तामाह यशोधनः ॥ २७ ॥

अन्वयः—नंदनस्य नरेंद्रत्व पदेन मुदितः अपि सन् दुःख अश्रूणि दधत् यशोधनः गेहवार्तां आह. ॥ २७ ॥

अर्थः—पुत्रनी राजानी पदवीथी खुशी थया छतां पण दुःखनां आंसुओ धारण करतो ते यशोधन शेठ घरनी वात कहेवा लाग्यो के, ॥ २७ ॥

धीमन्गते त्वयि तदा हंसो भोक्तुं निवेशितः । भूमौ पपात संजातभ्रमिर्भुक्तार्धभोजनः ॥ २८ ॥

अन्वयः—(हे) धीमन्! त्वयि गते तदा भोक्तुं निवेशितः हंसः भुक्त अर्ध भोजनः संजातभ्रमिः भूमौ पपात. ॥ २८ ॥

अर्थः—हे बुद्धिमान् केशव! तारा गयाबाद तेज वखते भोजन करवा माटे बेसाडेलो हंस अर्धु भोजन कर्या बाद चक्री आववाथी जमीनपर पडी गयो. ॥ २८ ॥

एतत्किमिति तन्मात्रा दीपे दूरादुपाहृते । तदन्नेऽदर्शि गरलं तुलापट्टे च पन्नगः ॥ २९ ॥

अन्वयः—एतत् किं? इति तन्मात्रा दूरात् दीपे उपाहृते तत् अन्ने गरलं, च तुलापट्टे पन्नगः अदर्शि. ॥ २९ ॥

अर्थः—आ ते शुं थयुं? एम (बोलती) तेनी माताए दूरथी दीवो(त्यां)लाव्याबाद तेने पीरसेला अन्नमां झेर, तथा भारवटीयामां (लटकतो) सर्प जोवामां आव्यो. ॥ २९ ॥

धर्मज्ञं मन्यमानेन त्वां तदा तदुदाहृतेः । कुटुम्बेन महाक्रन्दश्चक्रे दिक्चक्रविक्रमी ॥ ३० ॥

अन्वयः—तत् उदाहृतेः तदा त्वां धर्मज्ञं मन्यमानेन कुटुंबेन दिक्चक्रविक्रमी महाक्रंदः चक्रे. ॥ ३० ॥

अर्थः—ते उदाहरणथी ते वखते तने धर्मनो रहस्य जाणनार मानता एवा कुटुंबे दिशाओना समूहमां व्यापे एवी महोटी रडा-पीट करवा मांडी. ॥ ३० ॥

तदाक्रन्दमिलल्लोकवर्ती विषभिषग्वरः । एको हि मान्त्रिकाह्वानकृतोद्यममुवाच माम् ॥ ३१ ॥

अन्वयः—तत् आक्रंद मिलत् लोकवर्ती एकः वरः विषभिषक् हि मांत्रिक आह्वान कृतोद्यमं मां उवाच. ॥ ३१ ॥

अर्थः—ते रडापीटथी(त्यां)एकठा थयेला लोकोमां उभेला कोइ एक झेर संबंधी वैद्यविद्या जाणनारा उत्तम वैद्ये खरेखर मंत्रवादीओने बोलाववा माटे उद्यम करता एवा मने कह्युं के, ॥ ३१ ॥

न कार्यः क्लेशलेशोऽपि सर्पस्यास्य विषक्लमैः । सटत्त्रुटद्गलत्कायो मासमेवैष जीवति ॥ ३२ ॥

अन्वयः—क्लेशलेशः अपि न कार्यः, अस्य सर्पस्य विषक्लमैः सटत् त्रुटत् गलत् कायः एषः मासं एव जीवति. ॥ ३२ ॥

अर्थः—(हवे तमो) नाहक जराए महेनत न करो? आ सर्पनुं झेर चडवाथी (आ हंसनुं) शरीर सडवा, त्रुटवा तथा क्षीण थवा लागशे, तथा (ए रीते) ते फक्त एक मास सुधीज हवे जीवी शकशे. ॥ ३२ ॥

जनं विसृज्य शय्यायां शायितोऽथ त्वदग्रजः । स्थितोऽस्मि तत्स्वरूपं च ज्ञातुं पञ्चदिनीं गृहे ॥ ३३ ॥

अन्वयः—अथ जनं विसृज्य त्वदग्रजः शय्यायां शायितः, च तत्स्वरूपं ज्ञातुं पंचदिनीं गृहे स्थितः अस्मि. ॥ ३३ ॥

अर्थः—पछी लोकोने विसर्जन करीने त्हारा ते म्होटा भाइ हंसने शय्यामां सुवाड्यो, तथा तेनी तबीयतनी स्थिति जोवामाटे

पांच दिवसो सुधी हुं घरमांज रह्यो. ॥ ३३ ॥

रोमरोमपतच्छिद्रं मत्वाथ मृतमेव तम् । त्वां दृष्टुं निरगां गेहात्सुकृतैर्दर्शितोऽसि च ॥ ३४ ॥

अन्वयः—अथ रोम रोम पतत् छिद्रं तं मृतं एव मत्वा त्वां दृष्टुं गेहात् निरगां, च सुकृतैः दर्शितः असि. ॥ ३४ ॥

अर्थः-पछी रुंवाडे रुंवाडे जेने छिद्रो पडेलां छे, एवा ते हंसने मरेलोज मानीने तने मळवामाटे हुं घेरथी निकळ्यो छुं, तथा पुण्ययोगे ( आ ) तने मळ्यो छुं. ॥ ३४ ॥

विषग्रासदिनान्मासः पूर्णः क्ष्मामटतो मम । त्वज्ज्येष्ठोऽद्य मृतो वास्तु म्रियतां वा हतोऽस्मि हा ॥३५॥

अन्वयः-क्ष्मां अटतः मम अद्य विषग्रास दिनात् मासः पूर्णः, त्वत् ज्येष्ठः मृतः अस्तु, वा म्रियतां. वा हा हतः अस्मि. ॥३५॥

अर्थः-पृथ्वीपर भमतां मने आजे तेना झेरी अनाज खावाना दिवसथी एक मास पूरो थयो छे, माटे (आजे तो) ते तारो म्होटो भाइ मरी गयो हशे, अथवा मरण पामशे अरे! हुं तो (हवे) मुवोज पड्यो छुं! ॥ ३५ ॥

योजनानां शतमितस्तत्पुरं मत्पुराद्भवेत् । कथं याम्यद्य तत्राशु जीवद्बन्धुमुखोत्सुकः ॥ ३६ ॥
तद्वार्तार्त इति ध्यायन्नेव हंसस्य पार्श्वगम् । स्वमैक्षत ततः क्ष्मापः सतातं सपरिच्छदम् ॥ ३७॥ युग्मम्

अन्वयः—ततः तत् वार्तार्तः क्ष्माप इतः मत्पुरात् तत् पुरं योजनानां शतं भवेत्, जीवत् बंधु मुख उत्सुकः अद्य तत्र आशु कथं यामि? इति ध्यायन् एव स्वं सतातं सपरिच्छदं हंसस्य पार्श्वगं ऐक्षत. ॥ ३६ ॥ ३७ ॥ युग्मं ॥

अर्थः—पछी ते वृत्तांतथी पीडित थयेलो ते राजा आ म्हारा नगरथी ते नगर एकसो जोजन दूर छे, तो ( म्हारा ते) जीवता भाइनु मुख जोवाने उत्सुक थयेलो एवो हुं, आजे त्यां तुरत केम पहोंची शकुं? एम विचारतांज ते पोताने (पोताना) पिता तथा परिवारसहित हंसनी पासे बेठेलो जोवा लाग्यो. ॥ ३६ ॥ ३७ ॥ युग्मं ॥

कुथितांगातिदुर्गन्धत्रस्तबन्धुकदम्बकम् । एकयैवाम्बयायुक्तं रोदनोच्छूननेत्रया ॥ ३८ ॥
अर्तिभिर्नरकार्तीनां सारोद्धारैरिवार्दितं । आसन्नमृत्युं भूक्षिप्तं दुःखी हंसं ददर्श सः ॥ युग्मं॥ ॥ ३९ ॥

अन्वयः-कुथित अंग अति दुर्गंध त्रस्त बंधु कदंबकं, रोदन उच्छून नेत्रया एकया अंबया एव युक्तं, ।। ३८ ।। नरकार्तीनां सारोद्धारैः इव अर्तिभिः अर्दितं, आसन्नमृत्युं, भूक्षिप्तं हंसं दुःखी सः ददर्श. ।। ३९ ।। युग्मं ।।

अर्थः-सडी गयेलां शरीरमांथी (निकळता) घणा दुर्गंधथी (कंटाळीने) दूर बेठो छे कुटुंबनो समूह जेनाथी, तथा रुदन करवाथी सूजीगयेल छे नेत्रो जेणीना, एवी फक्त एक माताथीज युक्त थयेला, (अर्थात् जेनी नजदीक फक्त एक माताज बेठेली छे एवा) ।। ३८ ।। तथा नरकनी पीडाओनो जाणे सार खेंची कहाड्यो होय नही ? एवी वेदनाओथी पीडित थयेला, नजदीक छे मृत्यु जेने एवा, तथा भोंये लीधेला एवा ते हंसने ते दुःखी केशवे जोयो. ।। ३९. ।। युग्मं ।।

तद्व्यथाव्यथितोऽपीदृग्दूरमार्गद्रुतागतौ । कुतः शक्तिरिति ध्यायन्सोऽपश्यद्वह्निदैवतम् ।। ४० ।।

अन्वयः-तद्व्यथाव्यथितः अपि सः ईदृग् दूर मार्ग द्रुत आगतौ कुतः शक्तिः ? इति ध्यायन् वह्निदैवतं अपश्यत्. ।। ४० ।।

अर्थः-ते हंसनी वेदनाथी पीडीत थयेला एवा पण ते केशवे, आटले बधे दूर मार्गे एकदम आववामां (मने) क्यांथी शक्ति आवी?

एम विचारतां थकां (त्यां) तेणे वह्निदेवने जोयो. ॥ ४० ॥

**मा कार्षीर्विस्मयं मत्वावधिज्ञानात्तव व्यथाम् । आगां कर्तुं वरं सत्यमित्युक्त्वागाद्दिवं सुरः ॥ ४१ ॥**

अन्वयः-विस्मयं मा कार्षीः, अवधिज्ञानात् तव व्यथां मत्वा वरं सत्यं कर्तुं आगां, इति उक्त्वा सुरः दिवं अगात्. ॥ ४१ ॥

अर्थः-(तुं) आश्चर्य नही पाम ! अवधिज्ञानथी तारुं कष्ट जोइने (आपेलां) वरदानने सत्य करवा माटे हुं आव्यो छुं, एम कही (ते) देव देवलोकमां गयो. ॥ ४१ ॥

**हृष्टेन केशवेनाथ पाणिस्पृष्टेन पाथसा । हंसः सिक्तश्च रोगौघमुक्तश्च द्रुतमुत्थितः ॥ ४२ ॥**

अन्वयः—अथ हृष्टेन केशवेन पाणिस्पृष्टेन पाथसा हंसः सिक्तः, च रोग ओघ मुक्तः, च द्रुतं उत्थितः ॥ ४२ ॥

अर्थः—पछी खुशी थयेला ते केशवे (पोताना) हाथे स्पर्श करेला जलवडे ते हंसने न्हवराव्यो, (तेथी ते) रोगना समूहथी मुक्त थयो, तथा तुरतज बेठो थयो. ॥ ४२ ॥

पूर्वस्मादुत्तरेणैव वपुषा विपूलद्युतौ । जातेऽस्मिन्बन्धुवर्गस्य प्रावर्तन्त महोत्सवाः ॥ ४३ ॥

अन्वयः—पूर्वस्मात् उत्तरेण एव वपुषा विपुलद्युतौ अस्मिन् जाते बंधुवर्गस्य महोत्सवाः प्रावर्तंत. ॥ ४३ ॥

अर्थः—पहेलांथी पण वधारे सारां थयेलां शरीरवडे करीने घणा तेजवाळो ते केशव थयं छते (तेना) कुटुंबवर्गमां महोत्सवो थवा लाग्या. ॥ ४३ ॥

एवं प्रभावमुद्भाव्य केशवस्य नरेशितुः । दधौ व्याधिवधाय स्वे मूर्ध्नि पादोदकं न कः ॥ ४४ ॥

अन्वयः—एवं केशवस्य नरेशितुः प्रभावं उद्भाव्य व्याधिवधाय स्वे मूर्ध्नि कः पादोदकं न दधौ? ॥ ४४ ॥

अर्थः—एवीरीते ते केशवराजानो प्रभाव जोइने (पोताना) रोगनो नाश करवा माटे पोताना मस्तकपर कोणे (तेनुं) चरणोदक धारण न कर्युं? (अर्थात् सर्व रोगीओए तेम कर्युं.) ॥ ४४ ॥

किं वर्ण्यः केशवोर्वीशः सिषेवे यत्पदोदकम् । भूतभाविरुजो भेत्तुमासमुद्रं नृपैरपि ॥ ४५ ॥

अन्वयः-केशवः ऊर्वीशः किं वर्ण्यः? यत्पदोदकं भूतभाविरुजः भेत्तुं आ समुद्रं नृपैरपि सिषेवे. ॥ ४५ ॥

अर्थः—आ केशवराजानी केटली प्रशंसा करीयें? जेना चरणोदकने, थयेला तथा थनारा रोगोनो नाश करवामाटे छेक समुद्रकिनारा सुधीना (सघळा) राजाओए पण अंगीकार कर्युं. ४५ ॥

**भाविरोगभिया स्वर्णकलशे क्षिप्तमोकसि । न जीवितमिवारक्षि केनोर्व्यां तत्पदोदकम् ॥ ४६ ॥**

अन्वयः-ऊर्व्यां भाविरोगभिया तत्पदोदकं स्वर्णकलशे क्षिप्तं जीवितं इव ओकसि केन न अरक्षि? ॥ ४६ ॥

अर्थः—(वळी) आ पृथ्वीपर थनारा रोगना डरथी ते केशव राजानुं चरणोदक सुवर्णना कळशमां राखीने (पोताना) जीवनी पेठे घरमां कोणे न साचवी राख्युं? (अर्थात् सर्व लोकोए संघरी राख्युं) ॥ ४६ ॥

**सद्यः प्रभावमासाद्य भूपतेरिति धर्मजम् । रात्र्याहारपरीहारपरा जज्ञे धरा स्वयम् ॥ ४७ ॥**

अन्वयः—इति भूपतेः धर्मज सद्यः प्रभावं आसाद्य धरा स्वयं रात्रि आहार परीहार परा जज्ञे. ॥ ४७ ॥

अर्थः-एवीरीते ते केशवराजानो धर्म सबंधी तुरत थयेलो चमत्कार जोइने पृथ्वी एटले पृथ्वीपर वसता लोको पोतानी मेळेज रात्रिभोजनना त्यागमां तत्पर थया. ॥ ४७ ॥

अथायं दिग्जयं कृत्वा स्थित्वा साकेतपत्तने । पात्वा चिरं धरामत्रामुत्राभूत्परमः सुखी ॥ ४८ ॥

॥ इति रजनीभोजनत्यागे हंस केशवकथा ॥

अन्वयः—अथ अयं दिग्जयं कृत्वा, साकेतपत्तने स्थित्वा, चिरं धरां पात्वा, अत्र अमुत्र परमः सुखी अभूत्. ॥ ४८ ॥

अर्थः—पछी ते केशवराजा दिग्विजय करीने, तथा साकेतनगरमां रहीने, अने घणा काळसुधी पृथ्वीनुं रक्षण करीने आलोक अने परलोकमां अत्यंत सुखी थयो. ॥ ४८ ॥

॥ इति रजनीभोजनत्यागे हंस केशवकथा. ॥

इति श्रीरात्रिभोजनपरित्यागफलोपदर्शने श्रीहंसकेशवचरित्रं समाप्तं. आ चरित्र श्रीवर्धमानसूरिविरचित श्री वासुपूज्यचरित्रनामना महाकाव्यमांथी स्वपरना श्रेय माटे ओधरीने तेना अन्वय तथा गुजराती भाषांतर सहित जामनगर निवासी पंडित श्रावक हीरलाल हंसराजे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्युं छे. ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजय सुप्रसादात् ॥ श्रीरस्तु ॥

॥ इति श्रीहंसकेशव चरित्रं समाप्तं ॥